दोब्राह्मणानि च तद्विषयाणि॥तदस्मिन्नस्तीति देशे तन्नाम्नि॥
तेन निर्वृत्तं॥तस्य निवासः॥अदूरभवश्च॥ओरञ्॥मतोश्च
बह्वजंघात्॥बह्वचः कूपेषु॥उदक्च विपाशः॥संकलादिभ्य
श्च॥स्त्रीषु सौवीरसाल्वप्राक्षु॥सुवास्त्वादिभ्योऽण्॥रोणी॥को
पधाच्च॥वुञ्छण्कठजिल्सेनिरढञ्ण्ययफक्फिञिञ्ञ्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कक्ठकोरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखि
संकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः॥
४॥ जनपदे लुप्॥ वरणादिभ्यश्च॥ शर्कराया वा॥ ठक्छौ
च॥ नद्यांमतुप्॥ मध्वादिभ्यश्च॥ कुमुदनडवेतसेभ्योड्म
४२ तुप्॥ नडशाद्ड्वलच्॥ शिखाया वलच्॥ उत्करादिभ्यश्छः॥
नडादीनांकुक्च॥ शेषे॥ राष्ट्रावारपाराद्घखौ॥ ग्रामाद्य ४२
चौ खञौ॥ कत्र्यादिभ्यो ढकञ्॥ कुलकुक्षिग्रीवाभ्यःश्वास्यलं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कारेषु ॥ नद्यादिभ्यो ढक् ॥ दक्षिणापश्चात्पुरसस्त्यक् ॥ कापिश्या स्य
ष्फक् ॥ रंकोरमनुष्येण्च ॥ ५ ॥ द्युप्रागपागुदक्प्रतीचो यत् ॥ कं
थायाष्ठक् ॥ वर्णौ वुक् ॥ अव्ययात्त्यप् ॥ ऐषमोह्यःश्वसोन्यतर
स्यां ॥ तीररूप्योत्तरपदादञ्ञौ ॥ दिक्पूर्वपदात्संज्ञायां ञः ॥
मद्रेभ्योञ् ॥ उदीच्यग्रामाच्च बह्वचोन्तोदात्तात् ॥ प्रस्थोत्तरप
दपलद्यादिकोपधादण् ॥ कण्वादिभ्यो गोत्रे ॥ इञश्च ॥ न द्व्य
चः प्राच्यभरतेषु ॥ वृद्धाच्छः ॥ भवतष्ठक्छसौ ॥ काश्यादिभ्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्ठञ्ञिठौ ॥ वाहीकग्रामेभ्यश्च ॥ विभाषोशीनरेषु ॥ ओर्देशे ठञ् ॥
वृद्धात्प्राचां ॥ ॥ धन्वयोपधाद्वुञ् ॥ प्रस्थपुरवहान्ताच्च ॥ रोप
धेतोः प्राचां ॥ जनपदतदवध्योश्च ॥ अवृद्धादपि बहुवच
नविषयात् ॥ कच्छाग्निवक्त्रगर्त्तोत्तरपदात् ॥ धूमादिभ्य
४४ श्च ॥ नगरात्कुत्सनप्रावीण्ययोः ॥ अरण्यान्मनुष्ये ॥ विभा ४४
षा कुरुयुगंधराभ्यां ॥ मद्रवृज्योः कन् ॥ कोपधादण् ॥ क
च्छादिभ्यश्च ॥ मनुष्यतत्स्थयोर्वुञ् ॥ अपदातौ साल्वात् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोयवाग्वोश्च॥ गर्त्तोत्तरपदाच्छः॥ गहादिभ्यश्च॥ प्राचां कटादेः॥
राज्ञः क च॥ ७॥ वृद्धादकेकान्तखोपधात्॥ कंथापलदनगरग्रा
मह्रदोत्तरपदात्॥ पर्वताच्च॥ विभाषा मनुष्ये॥ कृकणपर्णाद्भा
रद्वाजे॥ ८॥ तेन नसास्मिन्न० अूकवचनः ङ्कमादिभ्यो जनपदेषु
प्रागपागुधन्ववृद्धासंच॥ ५॥ चतुर्थस्य द्वितीयः पादः॥ ॥ यु
ष्मदस्मदोरन्यतरस्यां खञ्च॥ तस्मिंनणि च युष्माकास्मा
कौ॥ तवकममकावेकवचने॥ अर्धाद्यत्॥ परावराध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मोत्तमपूर्वाच्च ॥ दिक्पूर्वपदाट्ठञ्च ॥ ग्रामजनपदैकदेशादञ्ठञौ ॥
मध्यान्मः ॥ असांप्रतिके ॥ द्वीपादनुसमुद्रं यञ् ॥ कालाट्ठञ् ॥ श्राद्धे श
रदः ॥ विभाषा रोगातपयोः ॥ निशाप्रदोषाभ्यां च ॥ श्वसस्तुट् च ॥
संधिवेलाद्यृतुनक्षत्रेभ्योऽण् ॥ प्रावृष एण्यः ॥ वर्षाभ्यष्ठक् ॥ छं
४५ दसि ठञ् ॥ वसंताच्च ॥ श ॥ हेमंताच्च ॥ सर्वत्राण् च तलोपश्च ॥ सा ४५
यंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च ॥ विभाषा पूर्वाह्णापरा
भ्यां ॥ ह्णार्द्रामूलप्रदोषावस्कराद्वुन् ॥ पथः पंथ च ॥ अमावास्या
+ तत्र जातः ॥ प्रावृषष्ठप् ॥ संज्ञायां शरदो वुञ् ॥ पूर्वाह्णापराह्णा +

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यावा ॥ अच्च ॥ सिंधुवपकराभ्यां कन् ॥ अणञौ च ॥ श्रविष्ठाफल्गुन्य
नुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल्लुक् ॥ स्था
नांतगोशालखरशालाच्च ॥ वत्सशालाभिजिदश्वयुक्छतभि
षजो वा ॥ नक्षत्रेभ्यो बहुलं ॥ कृतलब्धक्रीतकुशलाः ॥ प्रायभ
वः ॥ उपजानूपकर्णोपनीवेष्ठक् ॥ २ ॥ संभूते ॥ कोशाड्ढञ् ॥ का
लात्साधुपुष्प्यत्पच्यमानेषु ॥ उप्ते च ॥ आश्वयुज्या वुञ् ॥ ग्रीष्मव
संतादन्यतरस्यां ॥ देयमृणे ॥ कलाप्यश्वत्थयवबुसाद्वुन् ॥ ग्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रावरसमाङ्ढञ्॥संवत्सराग्रहायणीभ्यांठञ्च॥व्याहरतिमृगः॥
तदस्यसोढं॥तत्रभवः॥दिगादिभ्योयत्॥शरीरावयवाच्च॥दृ
तिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ्॥ग्रीवाभ्योणच॥गंभीराञ्ञ्यः॥
अव्ययीभावाच्च॥अंतःपूर्वपदाट्ठञ्॥ग्रामात्पर्यनुपूर्वात्॥
४६ जिह्वामूलांगुलेश्छः॥वर्गांताच्च॥अशब्देयत्खावन्यतरस्यां॥क ४६
र्णललाटात्कनलंकारे॥तस्यव्याख्यानइतिचव्याख्यातव्य
नाम्नः॥बह्वचोंतोदात्ताट्ठञ्॥क्रतुयज्ञेभ्यश्च॥अध्यायेष्वेवर्षेः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रौ पौडाश्पुरोडाशात्ष्ठन्॥छंदसोयदणौ॥द्व्यज्दब्राह्मणर्क्प्रथ
माध्वरपुरश्चरणनामाख्याताट्ठक्॥अणृगयनादिभ्यः॥तत
आगतः॥ठगायस्थानेभ्यः॥शुंडिकादिभ्योण्॥विद्यायोनिसंबं
धेभ्योवुञ्॥ऋतष्ठञ्॥पितुर्यच्च॥गोत्रादंकवत्॥ ॥हेतुमनुष्ये
भ्योन्यतरस्यांरूप्यः॥मयट्च॥प्रभवति॥विदूराञ्ञ्यः॥तद्गच्छति
पथिदूतयोः॥अभिनिष्क्रामतिद्वारं॥अधिकृत्यकृतेग्रंथे॥शि
शुक्रंदयमसभद्वंद्वेंद्रजननादिभ्यश्छः॥सोस्यनिवासः॥अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भिजनश्च ॥ आयुधजीविभ्यश्छः पर्वते ॥ गंडिकादिभ्योञ्यः ॥ सिंधु
तक्षशिलादिभ्योण्ञौ ॥ तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ण
ढञ्यकः ॥ भक्तिः ॥ अचित्ताद्देशकालाट्ठक् ॥ महाराजाट्ठञ् ॥
वासुदेवार्जुनाभ्यां वुन् ॥ गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ् ॥ जनप
४७ दिनां जनपदवत्सर्वं जनपदेन समानशब्दानां बहुवचने ॥ ४७
॥ ५ ॥ तेन प्रोक्तं ॥ तित्तिरिवरतंतुखंडिकोखाच्छण् ॥ काश्य
पकौशिकाभ्यामृषिभ्यां णिनिः ॥ कलापिवैशंपायनांतेवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सिभ्यश्च॥पुराणप्रोक्तेषुब्राह्मणकल्पेषु॥शौनकादिभ्यश्छंदसि॥
कठचरकाल्लुक्॥कलापिनोऽण्॥छगलिनोढिनुक्॥पाराशर्य
शिलालिभ्यांभिक्षुनटसूत्रयोः॥कर्मंदकृशाश्वादिनिः॥तेनैक
दिक्॥तसिश्च॥उरसोयच्च॥उपज्ञाते॥कृतेग्रंथे॥संज्ञायां॥कु
लालादिभ्योवुञ्॥क्षुद्राभ्रमरवटरपादपादञ्॥तस्येदं॥
॥६॥रथाद्यत्॥पत्रपूर्वादञ्॥पत्राध्वर्युपरिषदश्च॥हलसी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राट्ठक्॥ द्वंद्वाद्वुन्वैरमैथुनिकयोः॥ गोत्रचरणाद्वुञ्॥ संघांकल
क्षणेष्वञ्यञिञामण्॥ शाकलाद्वा॥ छंदोगौक्थिकयाज्ञिकबह्
वृचनटाञ्ञ्यः॥ न दंडमाणवांतेवासिषु॥ रैवतिकादिभ्यश्छः॥
कौपिंजलहास्तिपदादण्॥ आथर्वणिकस्येकलोपश्च॥ तस्य
४८ विकारः॥ अवयवे च प्राण्योषधिवृक्षेभ्यः॥ बिल्वादिभ्योऽण्॥ ४८
कोपधाच्च॥ त्रपुजतुनोः षुक्॥ ओरञ्॥ अनुदात्तादेश्च॥ ७॥
पलाशादिभ्यो वा॥ शम्याष्ट्लञ्॥ मयड्वैतयोर्भाषायामभक्ष्या

छादनयोः॥ नित्यं वृद्धशरादिभ्यः॥ गोश्च पुरीषे॥ पिष्टाच्च॥ संज्ञायां ष
कन्॥ व्रीहेः पुरोडाशे॥ असंज्ञायां तिलयवाभ्यां॥ द्व्यचश्छंदसि॥
नोत्वद्वर्ध्रबिल्वात्॥ तालादिभ्योऽण्॥ जातरूपेभ्यः परिमाणे॥
प्राणिरजतादिभ्योऽञ्॥ जितश्च तत्प्रत्ययात्॥ क्रीतवत्परिमाणा
त्॥ उष्ट्राद्वुञ्॥ उमोर्णयोर्वा॥ एण्या ढञ्॥ गोपयसोर्यत्॥ ८॥ द्रो
श्च॥ माने वयः॥ फले लुक्॥ प्लक्षादिभ्योऽण्॥ जंब्वा वा॥ लुप् च॥
हरीतक्यादिभ्यश्च॥ कंसीयपरशव्ययोर्यञञौ लुक् च॥ ८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युष्मदस्मदोर्द्दमंतास्तं भूतेग्नामाडे तु मनुष्येभ्यस्तेन रथासल्लाग्णादि
भ्योद्रोश्चाण्णे ॥ चतुर्थस्य तृतीयः पादः ॥ ॥ प्राग्वहतेष्ठक् ॥ तेन दी
व्यतिखनतिजयतिजितं ॥ संस्कृतं ॥ कुलत्थकोपधादण् ॥ तरति ॥
गोपुच्छाट्ठञ् ॥ नौद्व्यचष्ठन् ॥ चरति ॥ आकर्षात्ष्ठल् ॥ पर्पादिभ्यष्ठ
४९ न् ॥ श्वगणाट्ठञ्च ॥ वेतनादिभ्योजीवति ॥ वस्नक्रयविक्रयाट्ठ ४९
न् ॥ आयुधाच्छच ॥ हरत्युत्संगादिभ्यः ॥ भस्त्रादिभ्यष्ठन् ॥ विभा
षाविवधवीवधात् ॥ अण्कुटिलिकायाः ॥ निर्वृत्तेक्षद्यूता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह्म्यः॥ क्रेर्मम्नित्यं॥१॥ अपमित्ययाचिताभ्यांकक्कनौ॥ संसृष्टे॥
चूर्णादिनिः॥ लवणाल्लुक्॥ मुद्गादण्॥ व्यंजनैरुपसिक्ते॥ ओ
जःसहोंभसावर्त्तते॥ तत्प्रत्यनुपूर्वमीपलोमकूलं॥ परिमुखं
च॥ प्रयच्छतिगर्ह्यं॥ कुसीददशैकादशात्ष्ठन्ष्ठचौ॥ उञ्छति॥
रक्षति॥ शब्ददर्दुरंकरोति॥ पक्षिमत्स्यमृगान्हंति॥ परिपंथं
चतिष्ठति॥ माथोत्तरपदपदव्यनुपदंधावति॥ आक्रंदाट्ठञ्च॥
पदोत्तरपदंगृह्णाति॥ प्रतिकंठार्थललामंच॥२॥ धर्मंच

रति ॥ प्रतिपथमेति ठंश्च ॥ समवायान्सँमवैति ॥ परिषदो ण्यः ॥ सेना सँ
कु याया वा ॥ संज्ञायां ललाटकुक्कुट्यौ पश्यति ॥ तस्य धर्म्यं ॥ अण्महिष्या
दिभ्यः ॥ ऋतोञ् ॥ अवक्रयः ॥ तदस्य पण्यं ॥ लवणाट्ठञ् ॥ किसँ शँ
रादिभ्यष्ठन् ॥ शलालुनोन्यतरस्यां ॥ शिल्पं ॥ मड्डुकझर्झरादण
५० न्यतरस्यां ॥ प्रहरणं ॥ परश्वधाट्ठञ्च ॥ शक्तियष्ट्योरीकक् ॥ अस्ति ५०
नास्ति दिष्टं मतिः ॥ शीलं ॥ छत्रादिभ्यो णः ॥ कर्माध्ययने वृत्तं ॥
बह्वच्पूर्वपदाट्ठच् ॥ हितं भक्षाः ॥ तदस्मै दीयते नियुक्तं ॥ श्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णामांसौदनाट्टिठन्॥ भक्तादणन्यतरस्यां॥ तत्र नियुक्तः॥ अगारां
ताट्ठन्॥ अध्यायिन्यदेशकालात्॥ कठिनांतप्रस्तारसंस्थानेषु प्र
व्यवहरति॥ निकटे वसति॥ आवसथात्ष्ठल्॥ प्राग्घिताद्यत्॥ त
द्वहति रथयुगप्रासंगं॥ धुरोयड्ढकौ॥ खः सर्वधुरात्॥ एकधु
राल्लुक्च॥ शकटादण्॥ हलसीराट्ठक्॥ संज्ञायां जन्याः॥ वि न्या
ध्यत्यधनुषा॥ धनगणं लब्धा॥ अन्नाण्णः॥ वशंगतः॥ पदमस्मि ब्धा
न्दृश्यं॥ मूलमस्याबर्हि॥ संज्ञायां धेनुष्या॥ गृहपतिनासंयुक्ते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ्यः ॥ नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्य
वध्यानाम्यसमसमितसंमितेषु ॥ धर्मपथ्यर्थन्यायादनपेते ॥
छंदसो निर्मिते ॥ उरसोऽण्च ॥ हृदयस्य प्रियः ॥ बंधने चर्षौ ॥ म
५१ तजनहलात्करणजल्पकर्षेषु ॥ तत्र साधुः ॥ प्रतिजनादिभ्यः
खञ् ॥ भक्ताण्णः ॥ ५ ॥ परिषदो ण्यः ॥ कथादिभ्यष्ठक् ॥ गुडा ५१
दिभ्यष्ठञ् ॥ पथ्यतिथिवसतिस्वपतेर्ढञ् ॥ सभायाय्यः ॥ ढ
श्छंदसि ॥ समानतीर्थे वासी ॥ समानोदरे शयित ओ चोदात्तः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोदराद्यः॥भवेछंदसि॥पाथोनदीभ्यांड्यण्॥वेशंतहिमवद्भ्या
मण्॥स्रोतसोविभाषाड्यड्ड्यौ॥सगर्भसयूथसनुताद्यन्॥तु
ग्राद्घन्॥अग्राद्यत्॥घछौच॥समुद्राभ्राद्घः॥बर्हिषिदत्तं॥
दूतस्यभागकर्मणी॥रक्षोयातूनांहननी॥रेवतीजगतीह
विष्याभ्यःप्रशस्ये॥असुरस्यस्वं॥मायायामण्॥तद्वानासामु
पधानोमंत्रइतीष्टकासुलुक्चमतोः॥अश्विमानण्॥वयस्या
सुमूर्ध्नोमतुप्॥मत्वर्थेमासतन्वोः॥मधोर्ञच॥ओजसोहनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यतेवो ॥ वेश्रोयत्रू आदेर्भगाद्यल्लू ॥ खच ॥ पूर्वैः कृतमिनयौ च ॥ अ
भ्रिःसंस्कृतं ॥ सहस्रेणसंमितौघः ॥ मतौ च ॥ सोममर्हतियः ॥ म
ये च ॥ मध्योः ॥ यसोःसमूहे च ॥ ० ॥ नक्षत्राद्घः ॥ सर्वदेवात्ताति
लू ॥ शिवशमरिष्टस्य करे ॥ भावे च ॥ ० ॥ श्रोगवहितेरपमित्य
याचिताभ्यां धर्मशीलंहल सीरात्परिषदोरक्षोयातूनां न
५२ क्षत्राच्चत्वारि ॥ ॥ इति चतुर्थस्य चतुर्थः पादः ॥ इति चतुर्थो
ध्यायः समाप्तः ॥ सूत्राणि ॥ ६२५ ॥ ॥ प्राक्क्रीताच्छः ॥ उग ५२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वादिभ्यो यत् ॥ कंबलाच्च संज्ञायां ॥ विभाषा हविरपूपादिभ्यः ॥ त
स्मै हितं ॥ शरीरावयवाद्यत् ॥ खलयवमाषतिलवृषब्रह्मण
श्च ॥ अजाविभ्यां थ्यन् ॥ आत्मन्विश्वजनभोगोत्तरपदात्खः ॥ स
र्वपुरुषाभ्यां णढञौ ॥ माणवचरकाभ्यां खञ् ॥ तदर्थं विकृतेः प्र
कृतौ ॥ छदिरुपधिबलेर्ढञ् ॥ ऋषभोपानहोर्ञ्यः ॥ चर्मणोञ् ॥
तदस्य तदस्मिन्स्यादिति ॥ परिखाया ढञ् ॥ प्राग्वतेष्ठञ् ॥
आर्हाद्गोपुच्छसंख्यापरिमाणाट्ठक् ॥ असमासे निष्कादिभ्यः ॥ २ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शता च्च ठन्यतावशते ॥ संख्याया अतिशदन्तायाः कन् ॥ वतोरिड्वा ॥
विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायां ॥ कंसाट्टिठन् ॥ शूर्पादञन्यतरस्यां ॥
शतमानविंशतिकसहस्रवसनादण् ॥ अध्यर्धपूर्वद्विगोर्लुगसंज्ञा
यां ॥ विभाषा कार्षापणसहस्राभ्यां ॥ द्वित्रिपूर्वान्निष्कात् ॥ बिस्ताच्च ॥
५२ विंशतिकात्खः ॥ खार्या ईकन् ॥ पणपादमाषशताद्यत् ॥ शाणाद्वा ॥
द्वित्रिपूर्वादण् च ॥ तेन क्रीतं ॥ तस्य निमित्तं संयोगोत्पातौ ॥ गोद्व्य ५२
चोसंख्यापरिमाणाश्वादेर्यत् ॥ पुत्राच्छ च ॥ ॥ सर्वभूमिपृथि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वीभ्यामणञौ ॥ तस्येश्वरः ॥ तत्र विदितइति च ॥ लोकसर्वलोकाभ्यां
ठञ् ॥ तस्य वापः ॥ पात्रात्ष्ठन् ॥ तदस्मिन्वृध्यायलाभशुल्कोप
दा दीयते ॥ पूरणार्धाट्ठन् ॥ भागाद्यच्च ॥ तद्धरति वहत्यावहति
भाराद्वंशादिभ्यः ॥ वस्नद्रव्याभ्यां ठन्कनौ ॥ संभवत्यवहरति प
चति ॥ आढकाचितपात्रात्खोन्यतरस्यां ॥ द्विगोष्ठंश्च ॥ कुलि
लु जाल्लुक्खौ च ॥ सोस्यांशवस्नभृतयः ॥ तदस्य परिमाणं ॥ सं
ख्यायाः संज्ञासंघसूत्राध्ययनेषु ॥ पंक्तिविंशतित्रिंशच्चत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रिंशत्संचाशत्षष्टिसप्तत्यशीतिनवतिशतं॥ पंचदशतौ वर्गे वा॥ ॥
सप्तनोञ्छंदसि॥ त्रिंशच्चत्वारिंशतो ब्राह्मणे संज्ञायांडण्॥ तदर्ह
ति॥ छेदादिभ्यो नित्यं॥ शीर्षछेदाद्यच्च॥ दंडादिभ्यो यः॥ छंदसि
च॥ पात्राद्घंश्च॥ कडंगरदक्षिणाछ्च॥ स्थाली बिलात्॥ यज्ञर्त्वि ५४
ग्भ्यांघखञौ॥ पारायणतुरायणचांद्रायणंवर्त्तयति॥ संशय
५४ मापन्नः॥ योजनंगछति॥ पथष्कन्॥ पंथो ण नित्यं॥ उत्तरपथे नै
नाहृतंच॥ कालात्॥ तेननिर्वृत्तं॥ तमधीष्टो भृतो भूतो भावी॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मासाद्व्यसियतत्वओ॥ द्विगोर्यपू॥ षण्मासाण्यश्च॥ अवयसिठंश्च॥ अव

समायाःरव॥ द्विगोर्वा॥ राश्यहः संवत्सराच्च॥ वर्षाल्लुक्च॥ चित्तव

ति नित्यं॥ षष्टिकाः षष्टिरात्रेण पच्यंते॥ वत्सरांतांत्छश्छंदसि॥

संपरिपूर्वात्खच॥ तेन परिजय्यलभ्यकार्यसुकरं॥ तदस्य

ब्रह्मचर्यं॥ तस्यचदक्षिणायज्ञाख्येभ्यः॥ तत्रचदीयतेकार्यं

भववत्॥ व्युष्टादिभ्योण्॥ तेनयथाकथाचहस्ताभ्यांणयतौ॥

संपादिनि॥ कर्मवेषाद्यत्॥ ॥ तस्मैप्रभवतिसंतापादिभ्यः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योगाच्च॥ कर्मण उकञ्॥ समयस्तदस्यप्राप्तं॥ ऋतोरण्॥ छं
दसि घस्॥ कालाद्यत्॥ प्रकृष्टे ठञ्॥ प्रयोजनं॥ विशाखाषा
ढादण्मथदंडयोः॥ अनुप्रवचनादिभ्यश्छः॥ समापनात्सपूर्व च
पदात्॥ ऐकागारिकट्चौरे॥ आकालिकडाद्यंतवचने॥ तेन
५५ तुल्यं क्रियाचेद्वतिः॥ तत्र तस्येव॥ तदर्हं॥ उपसर्गाच्छंदसि ५५
धात्वर्थे॥ तस्य भावस्त्वतलौ॥ आचत्वात्॥ ॥ नञ्पूर्वात्त
त्पुरुषादचतुरसंगतलवणवटयुधकतरसलसेभ्यः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पृथ्वादिभ्य इमनिज्वा ॥ वर्णदृढादिभ्यः ष्यञ्च ॥ गुणवचनब्राह्म
णादिभ्यः कर्मणि च ॥ स्तेनाद्यंनलोपश्च ॥ सख्युर्यः ॥ कपिज्ञा
त्योर्ढक् ॥ पत्यंतपुरोहितादिभ्यो यक् ॥ प्राणभृज्जातिवयोव
चनोद्गात्रादिभ्योञ् ॥ हायनांतयुवादिभ्योण् ॥ इगंताच्च लघुपू
र्वात् ॥ व्योपधाद्गुरूपोत्तमाद्वुञ् ॥ द्वंद्वमनोज्ञादिभ्यश्च ॥ गो
त्रचरणाच्छ्लाघात्याकारतदवेतेषु ॥ होत्राभ्यश्छः ॥ ब्रह्मण
स्त्वः ॥ २८ ॥ प्राक्क्रीताच्छः ॥ तोच्च सर्वभूमिसत्तनोञ् मासात्तस्मै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननञ्षोडश॥ इति पंचमाध्यायस्य प्रथमः पादः॥ धान्या
नां भवने क्षेत्रे खञ्॥ व्रीहिशाल्योर्ढक्॥ यवयवकषष्टिका
यत्॥ विभाषा तिलमाषोमाभंगाणुभ्यः॥ सर्वचर्मणः कृ
तः खखञौ॥ यथामुखसंमुखस्य दर्शनः खः॥ तत्सर्वा
५६ देः पथ्यंगकर्मपत्रपात्रं व्याप्नोति॥ आप्रपदं प्राप्नोति॥ अ
नुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु॥ परोवरपरंप ५६
रपुत्रपौत्रमनुभवति॥ अवारपारात्यंतानुकामं गामी॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समांसमांविजायते॥अद्यश्वीनावष्टब्धे॥आगवीनः॥अनु
ग्वलंगामी॥अध्वनोयत्खौ॥अभ्यमित्राच्छच॥गोष्ठात्खञ
भूतपूर्वे॥अश्वस्यैकाहगमः॥शालीनकौपीनेअधृष्टाका
र्ययोः॥२॥व्रातेनजीवति॥साप्तपदीनंसख्यं॥हैयंगवी
नंसंज्ञायां॥तस्यपाकमूलेपील्वादिकर्णादिभ्यः कुणब्जा
हचौ॥पक्षात्तिः॥तेनवित्तश्चुंचुप्चणपौ॥विनञ्भ्यांनानाञौ
नसह॥वेःशालच्छंकटचौ॥संप्रोदश्चकटच्॥अवात्कु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दारञ् ॥ नतेनासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः ॥ नेर्बिडज्बि
रीसचौ ॥ इनच्पिटच्चिकचि च ॥ उपाधिभ्यां त्यकन्नासन्नारू
ढयोः ॥ कर्मणि घटोठच् ॥ तदस्य संजातं तारकादिभ्य इत
च् ॥ प्रमाणे द्वयसज्दघ्नञ्मात्रचः ॥ पुरुषहस्तिभ्यामण् च ॥ य
५८ त्तदेतेभ्यः परिमाणे वतुप् ॥ किमिदंभ्यां वो घः ॥ [illegible] ॥ किमः सं
ख्यापरिमाणे डति च ॥ संख्याया अवयवे तयप् ॥ द्वित्रिभ्यां ५८
तयस्यायज्वा ॥ उभादुदात्तो नित्यं ॥ तदस्मिन्नधिकमिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दशांताड्डः ॥ शदंतविंशतेश्च ॥ संख्याया गुणस्य निमाने मयट् ॥
तस्य पूरणे डट् ॥ नांतादसंख्यादेर्मट् ॥ थट् च छंदसि ॥ षट्कति
कतिपयचतुरां थुक् ॥ बहुपूगगणसंघस्य तिथुक् ॥ वतोरि
थुक् ॥ द्वेस्तीयः ॥ त्रेः संप्रसारणं च ॥ विंशत्यादिभ्यस्तमडन्य
तरस्यां ॥ नित्यं शतादिमासार्धमाससंवत्सराच्च ॥ षष्ट्यादे
श्चासंख्यादेः ॥ मतौ छः सूक्तसाम्नोः ॥ अध्यायानुवाकयो
र्लुक् ॥ ॥ विमुक्तादिभ्योऽण् ॥ गोषदादिभ्यो वुन् ॥ तत्र कुशलः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पथः॥ आकर्षादिभ्यः कन्॥ धनहिरण्यात्कामे॥ स्वांगेभ्यः प्रसि
ते॥ उदराट्ठगाद्यूने॥ सस्येन परिजातः॥ अंशंहारी॥ तंत्रादचि
रापहृते॥ ब्राह्मणकोष्णिके संज्ञायां॥ शीतोष्णाभ्यां कारिणि॥ अ
धिकं॥ अनुकाभिकाभीकः कमिता॥ पार्श्वेनान्विच्छति॥ अयः
५८ शूलदंडाजिनाभ्यां ठक्ठञौ॥ तावतिथं ग्रहणमिति लुग्वा॥ ५८
स एषां ग्रामणीः॥ शृंखलमस्य बंधनं करभे॥ उत्क उन्मनाः॥
॥४॥ कालप्रयोजनाद्रोगे॥ तदस्मिन्नन्नं प्राये संज्ञायां॥ कु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

छं ल्माषादञ्॥ श्रोत्रियंश्छंदोधीते॥ श्राद्धमनेन भुक्तमिनिठनौ॥
पूर्वादिनिः॥ सपूर्वाच्च॥ इष्टादिभ्यश्च॥ छंदसिपरिपंथिपरिप
रिणौ पर्यवस्थातरि॥ अनुपद्यन्वेष्टा॥ साक्षाद्द्रष्टरि संज्ञायां॥
क्षेत्रियच्परक्षेत्रे चिकित्स्यः॥ इंद्रियमिंद्रलिंगमिंद्रदृष्टमिंद्रसृ
ष्टमिंद्रजुष्टमिंद्रदत्तमिति वा॥ तदस्यास्त्यस्मिंनिति मतुप्॥ रसा धौ
दिभ्यश्च॥ प्राणिस्थादातो लजन्यतरस्यां॥ सिध्मादिभ्यश्च॥ व
त्सांसाभ्यां कामबले॥ फेनादिलच्च॥ लोमादिपामादिपिच्छादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री

भ्यः शनेलचः ॥ ५ ॥ प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः ॥ तपःसहस्राभ्यां वि
नीनी ॥ अण् च ॥ सिकताशर्कराभ्यां च ॥ देशे लुबिलचौ च ॥ दंत
उन्नत उरच् ॥ ऊषसुषिमुष्कमधो रः ॥ द्युद्रुभ्यां मः ॥ केशाद्वोऽन्य
तरस्यां ॥ गांड्यजगात्संज्ञायां ॥ कांडांडादीरंनीरचौ ॥ रजःकृ
५१ ष्यासुतिपरिषदो वलच् ॥ दंतशिखात्संज्ञायां ॥ ज्योत्स्नातमि ५१
स्राशृंगिणोर्जस्विंनूर्जस्वलगोमिन्मलिनमलीमसाः ॥ अ
त इनिठनौ ॥ व्रीह्यादिभ्यश्च ॥ तुंदादिभ्य इलच् च ॥ एकगोपूर्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ठञ्नित्यं॥ शतसहस्रान्ताच्च निष्कात्॥ रूपादाहतप्रशंसयोर्य
प्॥ द॥ अस्मायामेधास्रजो विनिः॥ बहुलं छंदसि॥ ऊर्णाया यु
स्॥ वाचो ग्मिनिः॥ आलजाटचौ बहुभाषिणि॥ स्वामिन्नैश्वर्ये॥
अर्शआदिभ्योच्॥ द्वंद्वोपतापगर्ह्यात्प्राणिस्थादिनिः॥ वातातीसा
राभ्यां कुक्च॥ वयसि पूरणात्॥ सुखादिभ्यश्च॥ धर्मशीलवर्णा
न्ताच्च॥ हस्ताज्जातौ॥ वर्णाद्ब्रह्मचारिणि॥ पुष्करादिभ्यो देशे॥ ब
लादिभ्यो मतुबन्यतरस्यां॥ संज्ञायां मन्माभ्यां॥ कंशंभ्यां बभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युस्तितुतयसः॥ तुंदिवलिवटेर्भः॥ अहंशुभमोर्युस्॥ ८॥ धान्या
नां ज्ञातेन किमो विमुक्तकाकाल ग्रज्ञा श्रद्धास्मा या मेधाविंद्रा
तिः॥ पंचमाध्यायस्य द्वितीयः पादः॥ ॥ प्राग्दिशो विभक्तिः॥
किंसर्वनामबहुभ्योऽद्व्यादिभ्यः॥ इदम इश्॥ एतेतौ रथोः॥
६० एतदोऽन्॥ सर्वस्य सोऽन्यतरस्यां दि॥ पंचम्यास्तसिल्॥ तसे ६०
श्च॥ पर्यभिभ्यां च॥ सप्तम्यास्त्रल्॥ इदमो हः॥ किमोऽत्॥ वा
ह च छंदसि॥ इतराभ्योऽपि दृश्यंते॥ सर्वैकान्यकिंयत्तदः किं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कालेदा॥इदमोर्हिल्॥अधुना॥दानींच॥तदोदाच॥तयोर्दार्हिलौ
चछंदसि॥१॥अनद्यतनेर्हिलन्यतरस्यां॥सद्यःपरुत्परार्यैष
मःपरेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्यु
रुभयेद्युरुत्तरेद्युः॥प्रकारवचनेथाल्॥इदमस्थमुः॥किमश्च॥
थाहेतौचछंदसि॥दिक्छब्देभ्यःसप्तमीपंचमीप्रथमाभ्योदि
ग्देशकालेष्वस्तातिः॥दक्षिणोत्तराभ्यामतसुच्॥विभाषाप
रावराभ्यां॥अंचेर्लुक्॥उपर्युपरिष्टात्॥पश्चात्॥पश्चपश्चा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चछंदसि॥उत्तराधरदक्षिणादातिः॥एनबन्यतरस्यामदूरेपंचम्याः॥
दक्षिणादाच्॥आहिचदूरे॥उत्तराच्च॥पूर्वाधरावराणामसिपुर
धवश्चैषां॥अस्ताति च॥ विभाषावरस्य॥संख्याया विधार्थेधा॥
अधिकरणविचालेच॥एकाद्धो ध्यमुञन्यतरस्यां॥द्वित्र्योश्च धमु
६१ ञ्॥एधाच्च॥याप्येपाशप्॥पूरणाद्भागेतीयादन्॥प्रागेकादशा ६३
भ्योछंदसि॥षष्ठाष्टमाभ्यांञच॥मानपश्वंगयोःकन्लुकौच॥
एकादाकिनिच्चासहाये॥भूतपूर्वेचरट्॥षष्ठ्यारूप्यच॥अतिशा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यनेतमविष्ठनौ ॥ तिङश्च ॥ द्विवचनविभज्योपपदे तरबीयसुनौ ॥
अजादीगुणवचनादेव ॥ तुश्छंदसि ॥ प्रशस्यस्य श्रः ॥ [illegible] ॥ ज्य च ॥
वृद्धस्य च ॥ अंतिकबाढयोर्नेदसाधौ ॥ युवाल्पयोः कनन्यतरस्यां ॥
विन्मतोर्लुक् ॥ प्रशंसायां रूपप् ॥ ईषदसमाप्तौ कल्पप्देश्यदेशी
यरः ॥ विभाषा सुपो बहुच्पुरस्तात्तु ॥ प्रकारवचने जातीयर् ॥ प्रा
गिवात्कः ॥ अव्ययसर्वनाम्नामकच्प्राक्टेः ॥ कस्य च दः ॥ अ
ज्ञाते ॥ कुत्सिते ॥ संज्ञायां कन् ॥ अनुकंपायां ॥ नीतौ च तद्युक्तात्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्॥ बह्वचो मनुष्यनाम्नष्ठज्वा॥ घनिलचौ च॥ प्राचामुपादेरड
ज्वुचौ च॥ [illegible]॥ जातिनाम्नः कन्॥ अजिनान्तस्योत्तरपदलोपश्च॥
ठाजादावूर्ध्वं द्वितीयादचः॥ शेवलसुपरिविशालवरुणार्य
मादीनां तृतीयात्॥ अल्पे॥ ह्रस्वे॥ संज्ञायां कन्॥ कुटीशमीशुं
६२ डाभ्यो रः॥ कुत्वा डुपच्॥ कासूगोणीभ्यां ष्टरच्॥ वत्सोक्षाश्वर्ष ६२
भेभ्यश्च तनुत्वे॥ किंयत्तदो निर्धारणे द्वयोरेकस्य डतरच्॥
वा बहूनां जातिपरिप्रश्ने डतमच्॥ एकाच्च प्राचां॥ अवक्षेप

ण्कन्॥ इवेप्रतिकृतौ॥ संज्ञायांच॥ लुम्मनुष्ये॥ जीविकार्थेचा
पण्ये॥ देवपथादिभ्यश्च॥ ॥ वस्तेर्ढञ्॥ शिलायाढः॥ शाखा
दिभ्योयः॥ द्रव्यंच भव्ये॥ कुशाग्राछः॥ समासाच्च तद्विषया
त्॥ शार्करादिभ्योण्॥ अंगुल्यादिभ्यछक्॥ एकशालायाष्ठ
छजन्यतरस्यां॥ कर्कलोहितादीकक्॥ प्रत्नपूर्वविश्वेमा
त्थाल्छंदसि॥ पूगाञ्योग्रामणीपूर्वात्॥ व्रातच्फञोर
स्त्रियां॥ आयुधजीविसंघाञ्यड्वाहीकेष्वब्राह्मणराज

न्यात्॥ वृकाट्टेण्यण्॥ दामन्यादित्रिगर्त्तषष्ठाच्छः॥ पार्श्वादियौधेया कै
दिभ्योमणञौ॥ अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णाव
च्छ्रुमदणोयञ्॥ ञ्यादयस्तद्राजाः॥ [illegible]॥ प्राग्दिशोरनघृतनैर्वि
भाषाज्यच जातिनाम्नोवस्तेरेकोनविंशतिः॥ ३ इति पंचमस्य
६२ वै तृतीयः पादः॥ ॥ पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च॥ दं ६२
डव्यवसर्गयोश्च॥ स्थूलादिभ्यः प्रकारवचने कन्॥ अनत्यं
तगतौ क्तात्॥ न सामिवचने॥ बृहत्या आच्छादने॥ अषडक्षा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शितंग्वलंकर्मालंपुरुषाध्युत्तरपदात्खः ॥ विभाषांचेरदिक्स्त्रियां ॥ वैं
जात्यंताच्छबंधुनि ॥ स्थानांताद्विभाषा सस्थानेनेति चेत् ॥ किमेत्ति
ङव्ययघादाम्वद्रव्यप्रकर्षे ॥ अमु च छंदसि ॥ अनुगादिनष्ठ
क् ॥ अण् च स्त्रियाम् ॥ अणिनुणः ॥ विसारिणो मत्स्ये ॥ संख्या
याः क्रियाभ्यावृत्तिगणने कृत्वसुच् ॥ द्वित्रिचतुर्भ्यः सुच् ॥ ए
कस्य सकृच्च ॥ विभाषा बहोर्धा विप्रकृष्टकाले ॥ २ ॥ तत्प्रकृ
तवचने मयट् ॥ समूहवच्च बहुषु ॥ अनंतावसथेतिहभेष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जाड्यः । हेयतान्तात्तादर्थ्ये यतु । पादार्घाभ्यां च । अतिथेर्यः । देवा
तल् । अवेः कः । यावादिभ्यः कन् । लोहितान्मणौ । वर्णे चानि
त्ये । रक्ते । कालाच्च । विनयादिभ्यष्ठक् । वाचो व्याहृतार्थायां ।
तद्युक्तात्कर्मणोण् । ऊषधेरजातौ । पद्मादिभ्यश्च । मद्रस्ति
६४ कन् । सस्नौ प्रशंसायां । [illegible] रकज्येष्ठाभ्यां तिल्ता । तिलौ च छ ६४
दसि । बहुल्पार्थाच्छस्कारकादन्यतरस्यां । संख्यैकवच
नाच्च वीप्सायां । प्रतियोगे पंचम्यास्तसिः । अपादाने चाही

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यरुहोः ॥ अतिग्रहाव्यथनेक्षेपेष्वकर्त्तरितृतीयायाः ॥ हीयमा
नपापयोगाच्च ॥ षष्ठ्याव्याश्रये ॥ रोगाच्चापनयने ॥ अभूततद्भा
वे कृभ्वस्तियोगेसंपद्यकर्त्तरि च्विः ॥ अरुर्मनश्चक्षुश्चेतोर
होरजसांलोपश्च ॥ विभाषासातिकार्त्स्न्ये ॥ अभिविधौसंपदाच ॥
तदधीनवचने ॥ देयेत्राच ॥ देवमनुष्यपुरुषपुरुमर्त्येभ्योद्विती
यासप्तम्योर्बहुलं ॥ अव्यक्तानुकरणाद्द्व्यजवरार्धादनितौडा
च् ॥ कृञोद्वितीयतृतीयशंबबीजात्कृषौ ॥ संख्यायाश्चगु

ण्ां नाया॥ समयाच्च यापनायां॥ ॥ सपत्र निष्पत्रादतिव्यथने॥ नि निः प
ष्कुलां निष्कोषणे॥ सुखप्रियादानुलोम्ये॥ दुःखात्प्रातिलोम्ये॥
शूलात्पाके॥ सत्यादशपथे॥ मद्रात्परिवापणे॥ समासांताः॥ न
पूजनात्॥ किमः क्षेपे॥ नञस्तत्पुरुषात्॥ पथो विभाषा॥ बहु
६५ व्रीहौ संख्येये डजबहुगणात्॥ ऋक्पूरब्धूःपथामानक्षे॥ अ ६५
च्प्रत्यन्ववपूर्वात्सामलोम्नः॥ अक्ष्णोऽदर्शनात्॥ अचतुरवि
चतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवाहर्दिवसरजसनिः
श्रेयसपुरुषायुषद्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धो
क्षोपशुनगोष्ठश्वाः ॥ ब्रह्महस्तिभ्यांवर्चसः ॥ अवसमंधेभ्यस्तम
सः ॥ श्वसोवसीयःश्रेयसः ॥ ७८ ॥ अन्ववतप्ताद्रहसः ॥ प्रतेरुरसः
सप्तमीस्थात् ॥ अनुगवमायामे ॥ द्विस्तावात्रिस्तावावेदिः ॥ उप
सर्गाद्ध्वनः ॥ तत्पुरुषस्यांगुलेःसंख्याव्ययादेः ॥ अहःसर्वै
कदेशसंख्यातपुण्याच्चरात्रेः ॥ अह्नोह्नएतेभ्यः ॥ नसंख्यादेः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६६ समाहारे॥उत्तमैकाभ्यांच॥राजाहःसखिभ्यष्टच्॥गोरतद्धित ६६
लुकि॥अग्राख्यायामुरसः॥अनोश्मायःसरसांजातिसंज्ञयोः॥
ग्रामकौटाभ्यांचतक्ष्णः॥अतेःशुनः॥उपमानादप्राणिषु॥उ
त्तरमृगपूर्वाच्चसक्थ्नः॥नावोद्विगोः॥अर्धाच्च॥५॥खार्याःप्रा
चां॥द्वित्रिभ्यामंजलेः॥अनसंतांनपुंसकाच्छंदसि॥ब्रह्मणो
जानपदाख्यायां॥कुमहद्भ्यामन्यतरस्यां॥द्वंद्वाच्चुदषहां
तात्समाहारे॥अव्ययीभावेशरत्प्रभृतिभ्यः॥अनश्च॥नपुं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सकादन्यतरस्यां॥ नदीपौर्णमास्याग्रहायणीभ्यः॥ झयः॥ गिरे
श्च सेनकस्य॥ बहुव्रीहौ सक्थ्यक्ष्णोः स्वांगात्षच्॥ अंगुलेर्दारुणि॥
द्वित्रिभ्यां षमूर्ध्नः॥ पूंअरणीप्रमाण्योः॥ अंतर्बहिर्भ्यांच लोम्नः॥
अञ्नासिकायाः संज्ञायां नसंचास्थूलात्॥ उपसर्गाच्च॥ सुप्रा
तसुश्वसुदिवसारिकुक्षिचतुरश्रैणीपदाजपदप्रोष्ठपदाः॥ ६॥
नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्यां॥ नित्यमसिच्प्रजामेधयोः॥
बहुप्रजाः श्छंदसि॥ धर्मादनिच्केवलात्॥ जंभासुहरिततृण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोमेभ्यः॥ दक्षिणेर्मालुब्धयोगे॥ इच्कर्मव्यतिहारे॥ द्विदंड्या
दिभ्यश्च॥ प्रसंभ्यांजानुनोर्ज्ञुः॥ ऊर्ध्वाद्विभाषा॥ ऊधसोनङ्॥
धनुषश्च॥ वासंज्ञायां॥ जायाया निङ्॥ गंधस्येदुत्पूतिसु
६८ सुरभिभ्यः॥ अल्पाख्यायां॥ उपमानाच्च॥ पादस्यलोपोहस्त्या ६८
दिभ्यः॥ कुंभपदीषुच॥ संख्यासुपूर्वस्य॥ ॥ वयसिदंतस्य
दतृ॥ छंदसिच॥ स्त्रियांसंज्ञायां॥ विभाषाश्यावारोकाभ्यां॥
अग्रांतशुद्धशुभ्रवृषवराहेभ्यश्च॥ ककुदस्यावस्थायांलो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पः ॥ त्रिककुत्पर्वते ॥ उद्विभ्यां काकुदस्य ॥ पूर्णाद्विभाषा ॥ सुहृद्दुर्हृ
दौ मित्रामित्रयोः ॥ उरःप्रभृतिभ्यः कप् ॥ इनः स्त्रियां ॥ नद्यृतश्च ॥ शे
षाद्विभाषा ॥ न संज्ञायां ॥ ईयसश्च ॥ वंदिते भ्रातुः ॥ ऋतश्छंदसि ॥
नाडीतंत्र्योः स्वांगे ॥ निःप्रवाणिश्च ॥ ८ ॥ पादस्मातस्य तत्स्वकृत दक
सपत्रान्च वत भालर्वायोर्नञ्दुःसुभ्यो वयसि विंशतिः ॥ इति पं
चमाध्यायस्य चतुर्थः पादः ॥ पंचमोध्यायः समाप्तः ॥ सूत्राणि ५५ ॥
॥ ॐ श्रम ॥ ॥ एकाचो द्वे प्रथमस्य ॥ अजादेर्द्वितीयस्य ॥ नंद्राः संयोगा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दयः॥ पूर्वोभ्यासः॥ उभे अभ्यस्तं॥ जक्षित्यादयः षट्॥ तुजादीनां
दीर्घोभ्यासस्य॥ सन्यङोः॥ श्लौ॥ चङि॥ दाश्वान्साह्वान्मीढ्वां
श्च॥ ष्यङः॥ लिटि धातोरनभ्यासस्य॥ + संप्रसारणं पुत्रप
६८ त्योस्तत्पुरुषे॥ बंधुनि बहुव्रीहौ॥ वचिस्वपियजादीनां किति॥ ६८
ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङि-
ति च॥ लिट्यभ्यासस्योभयेषां॥ स्वापेश्चङि॥ स्वपिस्यमिव्येञां
यङि॥ न वशः॥ १॥ चायः की॥ स्फायः स्फी निष्ठायां॥ स्त्यः प्रपू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्वस्य ॥ द्रवमूर्त्तिस्पर्शयोःश्यः ॥ प्रतेश्च ॥ विभाषाभ्यवपूर्वस्य ॥ शृतं
पाके ॥ प्यायः पी ॥ लिड्यङोश्च ॥ विभाषाश्वेः ॥ णौ च संश्चङोः ॥ ह्वः
संप्रसारणं ॥ अभ्यस्तस्य च ॥ बहुलं छंदसि ॥ चायः की ॥ अपस्पृ
धेथामानृचुरानृहुश्चिच्युषेतित्याजश्राताश्रितमाशीराशी
र्त्ताः ॥ न संप्रसारणे संप्रसारणं ॥ लिटि वयो यः ॥ वश्चास्यान्य
तरस्यां किति ॥ वेञः ॥ २ ॥ ल्यपि च ॥ ज्यश्च ॥ विभाषा परेः ॥ व्यश्च ॥
आदेच उपदेशेऽशिति ॥ न व्यो लिटि ॥ स्फुरतिस्फुलत्योर्घञि ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्रीङ्जीनां णौ ॥ सिध्यतेरपारलौकिके ॥ मीनातिमिनोतिदीङां ल्य
पि च ॥ विभाषा लीयतेः ॥ खिदेश्छंदसि ॥ अपगुरो णमुलि ॥ चि
स्फुरोर्णौ ॥ प्रजने वीयतेः ॥ बिभेतेर्हेतुभये ॥ नित्यं स्मयतेः ॥ सृ
६१ जिदृशोर्झल्यमकिति ॥ अनुदात्तस्य चर्दुपधस्यान्यतरस्यां ॥ ६१
शीर्षंछंदसि ॥ २ ॥ ये च तद्धिते ॥ अचि शीर्षः ॥ पद्दन्नोमास्हृन्नि
शसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु ॥ धात्वादेः ष
स्सः ॥ णो नः ॥ लोपो व्योर्वलि ॥ वेरपृक्तस्य ॥ हल्ङ्याब्भ्यो दीर्घा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्सुतिस्यपृक्तं हल्॥ एङ्ह्रस्वात्संबुद्धेः॥ शेश्छंदसिबहुलं॥ ह्रस्वस्य
पिति कृति तुक्॥ संहितायां॥ छे च॥ आङ्माङोश्च॥ दीर्घात्॥ प
दांताद्वा॥ इको यणचि॥ एचोऽयवायावः॥ वांतो यि प्रत्यये॥ धा
तोस्तंनिमित्तस्यैव॥ ॥ क्षय्यजय्यौ शक्यार्थे॥ क्रय्यस्तदर्थे॥ भ
य्यप्रवय्ये च छंदसि॥ एकः पूर्वपरयोः॥ अंतादिवच्च॥ षत्वतुको
रसिद्धः॥ आद्गुणः॥ वृद्धिरेचि॥ एत्येधत्यूठ्सु॥ आटश्च॥ उपस
र्गादृति धातौ॥ वा सुप्यापिशलेः॥ औतोम्शसोः॥ एङि पररू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पं॥ङमाङोश्च॥उस्यपदांतात्॥अतोगुणे॥अव्यक्तानुकरणस्या
तइतो॥नाम्रेडितस्यांत्यस्यतुवा॥नित्यमाम्रेडितेडाचि॥५॥अ
कस्सवर्णेदीर्घः॥प्रथमयोःपूर्वसवर्णः॥तस्माच्छसोनःपुं
सि॥नौचि॥दीर्घाज्जसिच॥वाछंदसि॥अमिपूर्वः॥संप्रसा
७० रणा+दि+च्च॥एङःपदांतादति॥ङसिङसोश्च॥ऋतउत्॥ ७०
ख्यत्यात्परस्य॥अतोरोरप्लुतादप्लुते॥हशिच॥प्रत्योंकें
तःपादमध्यपरे॥अव्यादवद्यादवक्रमुरव्रतायमवंत्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वस्युषुच॥यजुःषुरः॥अपोजुषाणोवृष्णोवर्षिष्ठेंबेंबालेंबिकेपू
र्वे॥अंगइत्यादौच॥अनुदात्तेचकुधपरे॥ ॥अवपथासिच॥
सर्वत्रविभाषागोः॥अवङ्स्फोटायनस्य॥इंद्रेच॥प्लुतप्रगृ
ह्याअचिनित्यं॥आङोनुनासिकश्छंदसि॥इकोसवर्णेशाक
ल्यस्यह्रस्वश्च॥ऋत्यकः॥अप्लुतवदुपस्थिते॥ईचाक्रवर्म
णस्य॥दिवउत्॥एतत्तदोःसुलोपोकोरनञ्समासेहलि॥स्य
श्छंदसिबहुलं॥सोचिलोपेचेत्पादपूरणं॥सुट्कात्पूर्वः॥अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

डभ्यासव्यवायेपि॥ संपर्युपेभ्यः करोतौभूषणे॥ समवायेच॥
उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु॥ किरतौलवने॥७॥
हिंसायांप्रतेश्च॥ अपाच्चतुष्पाच्छकुनिष्वालेखने॥ कुस्तुंबु
रूणिजातिः॥ अपरस्पराः क्रियासातत्ये॥ गोष्पदंसेवितासे ७१
७१ सेवितप्रमाणेषु॥ आस्पदंप्रतिष्ठायां॥ आश्चर्यमनित्ये॥ व
र्चस्केवस्करः॥ अपस्करोरथांगं॥ विष्किरः शकुनिर्वि
किरोवा॥ ह्रस्वाच्चंद्रोत्तरपदेमंत्रे॥ प्रतिष्कशश्चकशेः॥ प्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्कायव हरिश्चंद्रादृषौ॥ मस्करमस्करिणौ वेणुपरिव्राजकयोः॥
कास्तीराजस्तुन्देनगरे॥ कारस्करो वृक्षः॥ पारस्करप्रभृती
नि च संज्ञायां॥ अनुदात्तं पदमेकवर्जं॥ कर्षात्वतो घञोंतउदा
त्तः॥ उञ्छादीनांच॥ ॥ अनुदात्तस्य च यत्रोदात्तलोपः॥ धा
तोः॥ चितः॥ तद्धितस्य॥ कितः॥ तिसृभ्यो जसः॥ चतुरः शः
सि॥ सावेकाचस्तृतीयादिर्विभक्तिः॥ अंतोदात्तादुत्तरपदा
दन्यतरस्यामनित्यसमासे॥ अंचेश्छंदस्यसर्वनामस्थानं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऊडिदं पदाद्यप्पुंरैद्युभ्यः॥ अष्टनो दीर्घात्॥ शतुरनुमो नद्यजा
दी॥ उदात्तयणो हल्पूर्वात्॥ नोङ्धात्वोः॥ ह्रस्वनुड्भ्यां मतुप्॥ ना
मन्यतरस्यां॥ ङ्याश्छन्दसि बहुलं॥ षट्त्रिचतुर्भ्यो हलादिः॥ झल्यु
पोत्तमं॥१॥ विभाषा भाषायां॥ नगोश्वन्साववर्णराडङ्क्रुङ्कृद्भ्यः॥
७२ दिवो झल्॥ नृ चान्यतरस्यां॥ तित्स्वरितं॥ तास्यनुदात्तेन्ङिद ७२
दुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः॥ आदिः सिचो
न्यतरस्यां॥ स्वपादिहिंसामच्यनिटि॥ अभ्यस्तानामादिः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनुदात्ते च॥सर्वस्य सुपि॥भीह्री भृहु मद जन धन दरिद्रा जागरां
प्रत्ययात्पूर्वं पिति॥लिति॥आदिर्णमुल्यन्यतरस्यां॥अचः क
र्तृयकि॥लिति थलि च सेटीडंतो वा॥ञ्नित्यादिर्नित्यं॥आमंत्रितस्य
च॥१थिमथोः सर्वनामस्थाने॥अंतश्च तवै युगपत्॥२०॥
क्षयो निवासे॥जयः करणं॥वृषादीनां च॥संज्ञायामुपमा
नं॥निष्ठा च द्व्यजनात्॥शुष्क धृष्टौ॥आशितः कर्त्ता॥रिक्ते
विभाषा॥जुष्टार्पिते च छंदसि॥नित्यं मंत्रे॥युष्मदस्मदोर्ङसि॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ङ्यश्च॥ यतोनावः॥ ईडवंदवृशंसदुहांण्यतः॥ विभाषावेण्विं
धानयोः॥ त्यागरागहासकुहश्वठक्रथानां॥ उपोत्तमं रिति॥
चङ्यन्यतरस्यां॥ मतोः पूर्वमात्संज्ञायां स्त्रियां॥ अंतोवत्याः॥
७३ ॥२२॥ ईवत्याः॥ चौ॥ समासस्य॥ १०॥ एकास्वश्चायोल्यपि ये ७३
चक्षय्याकोव पथा हिंसायामनुदात्तस्य विभाषा क्षय ईवत्या
स्त्री॥ ॥ ॥ इति षष्ठाध्यायस्य प्रथमः पादः॥ ॥ बहुव्रीहे
प्रकृत्या पूर्वपदं॥ तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमाना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्ययद्वितीयाकृत्याः॥ वृर्णोवर्णोघनेते॥ गाधलवणयोःप्रमाणो॥
हायाघंहायादे॥ प्रतिबंधिचिरकृछ्रयोः॥ पदेपदेत्रो॥ निवाते
वातत्राणो॥ ग्रारदेनार्त्तवे॥ अध्वर्युकषाययोर्जीतो॥ सदृशप्र
तिरूपयोःसादृश्ये॥ द्विगोप्रमाणो॥ गंतव्यपण्यंवाणिज्ये॥ मात्रो
पज्ञोपक्रमछायेनपुंसके॥ सुखप्रिययोर्हिते॥ शीतौच॥ स्वं
स्यामिनि॥ पत्यावैश्वर्ये॥ नभूवाकूचिद्दिधिषु॥ धाभुवनं॥१॥
आत्रांकाबाधनेदीयःसुसंभावने॥ पूर्वभूतपूर्वे॥ सविधस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नीडसमर्यादसवेशसदेशेषु सामीप्ये॥ विस्पष्टादीनि गुणवच
नेषु॥ श्रज्यावमकन्पापवत्सु भावे कर्मधारये॥ कुमारश्च॥ आ
दिः प्रत्येनसि॥ पूगेष्वन्यतरस्यां॥ इगंतकालकपालभगा
लशरावेषु द्विगौ॥ बह्वन्यतरस्यां॥ दिष्टिवितस्त्योश्च॥ सप्त ७५
७५ मी सिद्धशुष्कपक्वबंधेष्वकालात्॥ परिप्रत्युपापा वर्ज्यमाना
होरात्रावयवेषु॥ राजन्यबहुवचनद्वंद्वेंधकवृष्णिषु॥ सं
ख्या॥ आचार्योपसर्जनश्चांतेवासी॥ कार्तकौजपादयश्च॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महान्व्रीह्यपराह्णगृष्टीष्वासजाबालभारभारतहैलिहिलरौ
रवप्रवृद्धेषु॥ क्षुल्लकश्च वैश्वदेवे॥ उष्ट्रः सादिवाम्योः॥ २॥ गोः
सादसादिसारथिषु॥ कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्ली
लदृढरूपापारेवडवातैतिलकद्रूःपण्यकंबलोदासीभारा
णांच॥ चतुर्थीतदर्थे॥ अर्थे॥ क्तेच॥ कर्मधारयेनिष्ठा॥ अही
नेद्वितीया॥ तृतीयाकर्मणि॥ गतिरनंतरः॥ तादौचनितिकृ
त्यतौ॥ तवैचांतश्चयुगपत्॥ अनिगंतोंचतौवप्रत्यये॥ न्यधी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च॥ईषदन्यतरस्यां॥हिरण्यपरिमाणं धने॥प्रथमोचिरोपसं
पन्नौ॥कतरकतमौकर्मधारये॥आर्यौब्राह्मणकुमारयोः॥रा
जाच॥षष्ठीप्रत्येनसि॥[illegible]क्तेनित्यार्थे॥ग्रामःशिल्पिनि॥राजा
चप्रशंसायां॥आदिरुदात्तः॥सप्तमीहारिणौधर्म्येहरणे॥यु
७५ क्तेच॥विभाषाध्यक्षे॥पापंचशिल्पिनि॥गोत्रांतेवासिमाणवब्रा ७५
ह्मणेषुक्षेपे॥अंगानिमैरेये॥भक्ताख्यास्तदर्थेषु॥गोबिडाल
सिंहसैंधवेषूपमाने॥अकेजीविकार्थे॥प्राचांक्रीडायां॥अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णि नियुक्ते ॥ शिल्पिनि चाकृञः ॥ संज्ञायांच ॥ गोतंतियवंपाले ॥
णिनि ॥ उपमानंशब्दार्थप्रकृतावेव ॥ ॥ युक्तारोह्यादयश्च ॥
दीर्घकाशतुषभ्राष्ट्रवटंजे ॥ अंत्यात्पूर्वंबह्वचः ॥ ग्रामेनिवसं
तः ॥ घोषादिषुच ॥ छात्र्यादयः शालायां ॥ प्रस्थेवृद्धमकर्क्या
दीनां ॥ मालादीनांच ॥ अमहन्नवंनगरेनुदीचां ॥ अर्मेचावर्णं
द्व्यच्त्र्यच् ॥ नभूताधिकसंजीवमद्राश्मकज्जलं ॥ अंतः ॥ स
र्वंगुणकार्त्स्न्ये ॥ संज्ञायांगिरिनिकाययोः ॥ कुमार्यांवयसि ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उदकेकेवले॥द्विगौक्रतौ॥सभायांनपुंसके॥पुरेप्राचां॥अ
रिष्टगौडपूर्वेच॥५॥नहास्तिनफलकमार्देयाः॥कुसूलकूप
कुंभशालंबिले॥दिक्शब्दाग्रामजनपदाख्यानचानराटेषु॥
आचार्योपसर्जनश्चांतेवासिनि॥उत्तरपदवृद्धौसर्वंच॥बहु
व्रीहौविश्वंसंज्ञायां॥उदराश्वेषुषु॥क्षेपे॥नदीबंधुनि॥निष्ठो
पसर्गपूर्वमन्यतरस्यां॥उत्तरपदादिः॥कर्णोवर्णलक्षणा
त्॥संज्ञौपम्ययोश्च॥कंठपृष्ठग्रीवाजंघंच॥शृंगमवस्थायां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च॥ नञोजरमरमित्रमृताः॥ सोर्मनसी अलोमोषसी॥ क्रत्वादय
श्च॥ आद्युदात्तं द्व्यच्छंदसि॥ वीरवीर्यौ च॥ [illegible] ॥ कूलतीरतूलमूल
शालाक्षसममव्ययीभावे॥ कंसमंथशूर्पपाय्यकांडं द्विगौ॥ तत्पुरु
षे शालायां नपुंसके॥ कंथा च॥ आदिश्चिहणादीनां॥ चेलखेटक
टुककांडं गर्हायां॥ चीरमुपमानं॥ पललसूपशाकं मिश्रे॥ कूल
सूदस्थलकर्षाः संज्ञायां॥ अकर्मधारये राज्यं॥ वर्ग्यादयश्च॥
पुत्रः पुंभ्यः॥ नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः॥ चूर्णादी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च न्यग्रोधश्याः॥ षट्कांडादीनि॥ कुंडंवनं॥ प्रकृत्या भगालं॥ त्रितेर्निस्रावकुल्मावहुव्रीहावभस्रत्॥ भातिकारेकोपपदात्कृत्॥ उभेवनस्पत्यादिषु युगपत्॥ ७॥ देवताद्वंद्वेच॥ नोत्तरपदेनुदात्तादावपृथिवीरुद्रपूषमंथिषु॥ अंतः॥ थाथघञ्क्ताजबित्रकाणां॥ सूपमानात्क्तः॥

७७ संज्ञायामनाचितादीनां॥ प्रवृद्धादीनांच॥ कारकाद्दत्तश्रुतयोरेवाशिषि॥ इत्थंभूतेनकृतमितिच॥ अनोभावकर्मवचनः॥ मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादिक्रीताः॥ सप्तम्याःपुण्यं॥ ७८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऊनार्थकलहंतृतीयायाः॥ मिश्रंचानुपसर्गमसंधौ॥ नञोगु
णप्रतिषेधेसंपाद्यर्हहितालमर्थास्तद्धिताः॥ ययतोश्चातद
र्थे॥ अच्कावशक्तौ॥ आक्रोशेच॥ संज्ञायां॥ कृत्योकेष्णुच्चा
र्वादयश्च॥ ८॥ विभाषातृन्नन्नतीक्ष्णशुचिषु॥ बहुव्रीहावि
दमेतत्तद्भ्यःप्रथमपूरणयोःक्रियागणने॥ संख्यायाःस्तनः॥
विभाषाछंदसि॥ संज्ञायांमित्राजिनयोः॥ व्यवायिनोंतरं॥
मुखंस्वांगं॥ नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः॥ ह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निष्ठोपमानादन्यतरस्यां ।।जातिकालसुखादिभ्योनाछादनात्
क्तोकृतमितप्रतिपन्नाः ।।वाजाते ।।नञ्सुभ्यां ।।कपिपूर्वं ।।ह्रस्वां
तेंत्यात्पूर्वं ।।बहोर्नञ्वदुत्तरपदभूम्नि ।।नगुणादयोवयवाः ।।
उपसर्गात्स्वांगंध्रुवमपर्शु ।।वनंसमासे ।।अंतः ।।अंतश्च ।।१।।
७८ ननिविभ्यां ।।परेरभितोभावि मंडलं ।।प्रादस्वांगंसंज्ञायां ।। ७८
निरुदकादीनिच ।।अभेर्मुखं ।।अपाच्च ।।स्फिगपूतवीणां
जोध्वकुक्षि सीरनामनामच ।।अधेरुपरिस्थं ।।अनोरप्रधा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नकनीयसी॥ पुरुषश्चान्वादिष्टः॥ अंतेरक्तसदे॥ नेरनिधाने॥
प्रतेरंश्वादयस्तत्पुरुषे॥ उपाद्व्यज्जिनमगौरादयः॥ सोरव
क्षेपणे॥ विभाषोत्पुच्छे॥ द्वित्रिभ्यां पाद्दन्मूर्द्धसु बहुव्रीहौ॥ सक्थं
चाक्रांतात्॥ परादिश्छंदसि बहुलं॥१०॥ बहुव्रीहावात्रांकागोः
सादलके नियुक्तारो नहास्तिनकुलदेवता विभाषानन्येकोन
विंशतिः॥ इति षष्ठाध्यायस्य द्वितीयः पादः॥ ॥अलुगुत्तर
पदे॥ पंचम्यास्तोकादिभ्यः॥ ओजःसहोंभस्तमसस्तृतीयायाः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनसः संज्ञायां ॥ आज्ञायिनि च ॥ आत्मनश्च पूरणे ॥ वय्याकरणा
ख्यायां चतुर्थ्याः ॥ परस्य च ॥ हलदंतात्सप्तम्याः संज्ञायां ॥ कार
नाम्नि च प्राचां हलादौ ॥ मध्याद्गुरौ ॥ अमूर्द्धमस्तकात्स्वांगादका
मे ॥ बंधे च विभाषा ॥ तत्पुरुषे कृति बहुलं ॥ प्रावृट्शरत्काल
७१ दिवां जे ॥ विभाषा वर्षक्षरशरवरात् ॥ घकालतनेषु काल ७१
नाम्नः ॥ शयवासवासिष्वकालात् ॥ नेन्सिद्धबध्नातिषु च ॥ स्थे
च भाषायां ॥ २ ॥ षष्ठ्या आक्रोशे ॥ पुत्रेन्यतरस्यां ॥ ऋतो विद्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वंद्वे॥ देवता

योनिसंबंधेभ्यः॥ विभाषास्वसृपत्योः॥ आनङृतोद्वंद्वेच॥ ईदग्नेः
सोमवरुणयोः॥ इद्वृद्धौ॥ दिवोद्यावा॥ दिवसश्च पृथिव्यां॥ उषा
सोषसः॥ मातरपितरावुदीचां॥ पितरामातरा च छंदसि॥ स्त्रि
याः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपू
रणीप्रियादिषु॥ तसिलादिष्वाकृत्वसुचः॥ क्यङ्मानिनोश्च॥
नकोपधायाः॥ संज्ञापूरण्योश्च॥ वृद्धिनिमित्तस्य च तद्धितस्या
रक्तविकारे॥ स्वांगाच्चेतो मानिनि॥२ जातेश्च॥ पुंवत्कर्मधा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रयजातीयदेशीयेषु॥ घरूपकल्पजेलड्ब्रुवगोत्रमतहतेषु ङ्यो
नेकाचो ह्रस्वः॥ नद्याः शेषस्यान्यतरस्यां॥ उगितश्च॥ आन्मह
तः समानाधिकरणजातीययोः॥ द्व्यष्टनः संख्यायामबहुव्री
८० ह्यशीत्ययोः॥ त्रेस्त्रयः॥ विभाषा चत्वारिंशत्प्रभृतौ सर्वेषां॥ हृ ८०
दयस्य हृल्लेखयदण्लासेषु॥ वा शोकष्यञ्रोगेषु॥ पादस्य
पदाज्यातिगोपहतेषु॥ पद्यत्यतदर्थे॥ हिमकाषिहतिषु च॥
ऋचः शे॥ वा घोषमिश्रशब्देषु॥ उदकस्योदः संज्ञायां॥ पेषंवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सवाहनधिषु च ॥ एकहल्लादौ पूरयितव्येन्यतरस्यां ॥ मंथोदन
सक्तु बिंदु वज्र भार हार वीवध गाहेषु च ॥ ३ ॥ इको ह्रस्वोऽङ्यो गाल
वस्य ॥ एक तद्धिते च ॥ ङ्यापोः संज्ञाछंदसोर्बहुलं ॥ त्वे च ॥ इष्ट
केषीकामालानां चित तूल भारिषु ॥ खित्यनव्ययस्य ॥ अरुर्द्वि
षदजंतस्य मुम् ॥ इच एकाचोम्प्रत्ययवच्च ॥ वाचंयमपुरंदरौ च ॥
कारे सत्यागदस्य ॥ श्येनतिलस्य पाते ञे ॥ रात्रेः कृति विभाषा ॥
नलोपो नञः ॥ तस्मान्नुडचि ॥ नभ्राण्नपान्नवेदानासत्यान

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषुप्रकृत्या ॥ ए
कादिश्चैकस्यचादुक् ॥ नगोप्राणिष्वन्यतरस्यां ॥ सहस्यसः
संज्ञायां ॥ ग्रंथांताधिकेच ॥ द्वितीयेचानुपाख्ये ॥ ४ ॥ अव्य
यीभावेचाकाले ॥ वोपसर्जनस्य ॥ प्रकृत्याशिषि ॥ अगोवत्स
८१ हलेषु ॥ समानस्यछंदस्यमूर्द्धप्रभृत्युदर्केषु ॥ ज्योतिर्ज ८१
नपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबं
धुषु ॥ चरणेब्रह्मचारिणि ॥ तीर्थेये ॥ विभाषोदरे ॥ दृग्दृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वावतुषु ॥ इदं किमोरीश्की ॥ आ सर्वनाम्नः ॥ विश्वदे
वयोश्च टेरद्र्यंचतावप्रत्यये ॥ समः समि ॥ तिरसस्ति
र्यलोपे ॥ सहस्य सध्रिः ॥ सधमादस्थयोश्छंदसि ॥ द्व्यं
तरुपसर्गेभ्योपईत् ॥ ऊदनोर्देशे ॥ अषष्ठ्यतृतीयास्थ
स्यान्यस्य दुगाशीराशास्थास्थितोत्सुकोतिकारकरागछे
षु ॥ अर्थे विभाषा ॥ ५ ॥ कोः कत्तत्पुरुषेचि ॥ रथवदयोश्च ॥
